शिवः
कालि
स्त्रा०ह०

१

श्रीगणेशाय नमः ॥ भवानि स्तोतुं त्वां प्रभवति चतुर्भिर्न वदनैः प्रजानामी
शानस्त्रिपुरमथनः पंचभिरपि ॥१॥ न षड्भिः सेनानी दशशतमखैरप्यहि
पतिस्तदान्येषां केषां कथय कथमस्मिन्नवसरः ॥२॥ घृतक्षीरद्राक्षा मधुम
धुरिमा कैरपि पदैर्विशिष्यानाख्येयो भवति रसनामात्रविषयः ॥ तथा ते सौ
न्दर्यं परमशिवदृङ्मात्रविषयः कथं कारं ब्रूमः सकलनिगमागोचरगुणे ॥३॥
मुखे ते तांबूलं नयनयुगले कज्जलकला ललाटे काश्मीरं विलसति गले
मौक्तिकलता ॥ स्फुरत्कांची शाटी पृथुकटितटे हाटकमयी भजामस्
त्वां गौरीं नगपतिकिशोरीमविरतं ॥४॥ विराजन्मंदारद्रुमकुसुमहारस्तनत
टी नदद्वीणानादश्रवणविलसत्कुंडलगुणा ॥ नतांगी मातंगीरुचिरगति

१

शिवः
स्त्रा०ह०

२

त्वमसि परमब्रह्ममहिषि ॥९॥ प्रभूता भक्तिस्ते यदपि न ममालोलमनसः
... ना ॥ पयोदः पानीयं दिशति मधुरं चातककुले समुद्रः शंशंके कैवी विधिविधि
रनुनीता मम मतिः ॥१०॥ कृपापांगालोकं वितर तरसा साधुचरिते न ते यु
क्तोपेक्षा मयि शरणदीक्षामुपगते ॥ ॥ न चेदिष्टं दद्यादनुपदमहो क
ल्पलतिका विशेषः सामान्यैः कथमितरवल्लीपरिकरैः ॥११॥ महांतं वि
श्वासं तव चरणपंकेरुहयुगे निधायान्यन्नैवाश्रितमिह मया दैवतमुमे ॥
तथापि त्वच्चेतो यदि मयि न जायेत सदयं निरालंबो लंबोदरजननि कं या
मि शरणम् ॥१२॥ अयः स्पर्शे लग्नं सपदि लभते हेमपदवीं यथा रथ्यापाथः
शुचि भवति गंगौघमिलितं ॥ तथा तत्तत्पापैरतिमलिनमंतर्मम यदि

२

गवे॥

मंगी भगवती सती शंभोरंभोरुहचटुलचक्षुर्विजयते ॥५॥ नवीनार्कभ्राज
न्मणिकनकभूषापरिकरैर्वृतांगी सारंगीरुचिरनयनांगीकृतशिवा ॥ त
डित्पीता पीतांबरललितनितंबाशा मंजीरसुभगा ममापर्णा पूर्णा निरवधिसुखैरस्तु
सुमुखी ६ हिमाद्रेः संभूता सुललितकरैः पल्लवयुता सुपुष्पा मुक्ताभिर्भ्रम
रकलिता चालकभरैः ॥ कृतस्थाणुस्थाना कुचफलनता सूक्तिसरसा रुजां
हन्त्री गंत्री विलसति चिदानंदलतिका ॥७॥ सपर्णामाकीर्णां कतिपयगुणैः सा
दरमिह श्रयंत्यन्ये वल्लीं मम तु मतिरेवं विलसति ॥ अपर्णैका सेव्या जगति
सकलैर्यत्परिवृतः पुराणोपि स्थाणुः फलति किल कैवल्यपदवीं ॥८॥ विधा
त्री धर्माणां त्वमसि सकलाम्नायजननी त्वमर्थानां मूलं धनदनमनीयां
घ्रिकमले ॥ त्वमादिः कामानां जननि कृतकंदर्पविजये सतां मुक्तेर्बीजं

श्रावः

त्वयि भ्रमसा सत्कं कल्पमितनगाधेतविमलेम ॥१३॥ त्वदन्यस्मादिच्छा
विषयफललाभे न नियमस्त्वमर्थानामिच्छाधिकमपि समर्था वितर
णे ॥ इति प्राहुः प्राञ्चः कमलभवनाद्यास्त्वयि मनस्त्वदासक्तं नक्तं दिवमु
चितमीशानि कुरु तत् ॥१४॥ स्फुरन्नानारत्नस्फटिकमयभित्तिप्रति
फलत्त्वदाकारं चंचच्छशधरकलासौधशिखरं ॥ मुकुंदब्रह्मेंद्रप्रभृति
परिवारं विजयते तवागारं रम्यं त्रिभुवनमहाराजगृहिणि ॥१५॥ निवासः
कैलासे विधिशतमखाद्याः स्तुतिकराः कुटुंबं त्रैलोक्यं कृतकरपुटः सिद्धि
निकरः महेशः प्राणेशस्तदवनिधराधीशतनये न ते सौभाग्यस्य क्वचिद

ग्रावः
ग्रा० हं०

३

विमलेऽगास्निग्धलेना ॥१६॥ कचोत्काञ्चोनेत्रि श्मशाननाशानिवसने
श्मशाने क्रीडन्मर्कजगनिवहो भस्मधराविधिः ॥ समस्ता सा मन्त्री जगति
विदितैव स्मररिपोर्यद्देहस्यैश्वर्यं तव जननि सौभाग्यमहिमा ॥१८॥ त्रिशि
खत्रुल्लोऽद्भवन्नयविधिनेमत्रीकमतिः श्मशाने ध्यासीनः कृतभसितलेपः
पशुपतिः ॥ दधौ कण्ठे हालाहलमखिलभूगोलकृपया भवत्याः संगत्याः
फलमिति च कल्या[illegible]शिकलये ॥१९॥ त्वदीयं सौन्दर्यं निरतिशयमालोक्य
परया भियैवासीद्गङ्गा जलमयतनुः शैलतनये ॥ तदेतस्यास्तस्माद्वदनक
मलं वीक्ष्य कृपया प्रतिष्ठामातन्वे निजशिरसिवासेन गिरिशः ॥१९॥ विशा

३

श्रीवलनेहम् १
४

विशालश्रीखण्डद्रवमृगमदाकीर्णघुसृणा प्रसूनव्यामिश्रं भगव
ति तवाभ्यङ्गसलिलं ॥ समादाय स्रष्टा चलितपदपांसून्निजकरैः समाधत्ते स
ष्टिं विबुधपुरपङ्केरुहदृशां ॥२०॥ वसन्ते सानन्दे कुसुमितलताभिः परिवृ
ते स्फुरन्नानापद्मे सरसि कलहंसालिसुभगे ॥ सखीभिः खेलन्तीं मलयप
वनान्दोलितजले स्मरे[illegible]यस्त्वां तस्य ज्वरजनितपीडापसरति ॥२१॥ इति
श्रीश्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्भगवच्छंकराचार्यविरचि
तानन्दलहरी संपूर्णा ॥ ॥ समाप्तमिदं स्तोत्रं कालिकाश्चैव पुस्तकं हस्ताक्षरम् ॥